स्त्रियां जातित्वेऽपि संयोगोपधत्वात् टाप्। तस्य च सुखस्यास्नो दृष्टिगोचरत्वात् तथात्वम्। कीकसमुखादयोऽप्यत्र [ अमरटीका स्त्रियां ङीप्।

**कीकि** पुंस्त्री॰ कीतिशब्दं कायति कै वा॰ डि। चाषपक्षिणि

**कीचक** पु॰ कीत्यव्यक्तं चकति चक–तृप्त्यादौ अच्। १दैत्यभेदे "कीचका नाम ते वंशा ये स्वनन्त्यनिलाहताः" इत्युक्ते २वेणुभेदे (नलतावाँश)अमरः। "यः पूरयन् कीचकरन्ध्रभागान् दरीमुखोत्थेन समीरणेन" कुमा॰ "सङ्कीर्णकीचकवनस्खलितैकबालेत्यादि" माघः विराटराजस्याले ३केकयात्मजे विराटसेनाधिपभेदे च कीचकस्य द्रौपद्यामनुरागादिकथा भा॰वि॰अ॰ यथा—

"तस्मिन् वर्षे गतप्राये कीचकस्तु महाबलः। सेनापतिर्विराटस्य ददर्श द्रुपदात्मजाम्। तां दृष्ट्वा देवगर्भाभां चरन्तीं देवतामिव। कीचकः कामयामास कामबाणप्रपीडितः"। इत्युपक्रम्य सैरिन्ध्रीरूपां द्रौपदीं प्रति तत्प्रार्थने तया तस्य प्रत्याख्यानमुपवर्णितं यथा—

"सैरिन्ध्र्युवाच। मा सूतपुत्र! मुह्यस्व माऽद्यात्याक्षीः स्वजीवितम्। जानीहि पञ्चभिर्देवैर्नित्यं मामभिरक्षिताम्। न चाप्यहं त्वया लभ्या गन्धर्वाः पतयो मम। ते त्वां निहन्युः कुपिताः साध्वलन् मा व्यनीनशः। अशक्यरूपं पुरुषैरध्वानं गन्तुमिच्छसि। यथा निश्चेतनो बालः कूलस्थः कूलमुत्तरम्। तर्त्तुमिच्छति मन्दात्मा तथा त्वं तर्त्तुमिच्छसि। अन्तर्महीं वा यदि वोर्द्ध्वमुत्पतेः समुद्रपारं यदि वा प्रधावसि। तथाऽपि तेभ्यो न विमोक्षमर्हसि प्रमाथिनो देवसुता हि खेचराः। त्वं कालरात्रीमिव कश्चिदातुरः किं मां दृढं प्रार्थयसेऽद्य कीचक!। किं मातुरङ्के शयितो यथा शिशुश्चन्द्रं जिघृक्षुरिव मन्यसे हि माम्" १२अ॰। तथैवं निरस्तेन तेन स्वभगिनीं सुदेष्णां प्रति तस्यावश्यंतासम्पादनप्रार्थने तया तत्रोपायविधानं वर्णितं यथा—

"प्रत्याख्यातो राजपुत्त्र्या सुदेष्णां कीचकोऽब्रवीत्। अमर्यादेन कामेन घोरेणाभिपरिप्लुतः। कीचकउवाच। यथा कैकेयि! सैरिन्ध्री समेयात्तद्विधीयताम्। येनोपायेन सैरिन्ध्री भजेन्मां गजगामिनी। तं सुदेष्णे! परीप्सस्व नो चेत् प्राणान् प्रहासिषम्। वैशम्पायनउवाच। तस्य सा बहुशः श्रुत्वा वाचं विलपतस्तदा। विराटमहिषी देवी कृपाञ्चक्रे मनस्विनी। स्वार्थमभिसन्धाय तस्यार्थमनुचिन्त्य च। उद्योगञ्चैव कृष्णायाः सुदेष्णा सूतमब्रवीत्। सुदेष्णोवाच। पर्व्वणि त्वं समुद्दिश्य सुरामन्नञ्च कारय। तत्रैनां प्रेषयिष्यामि सुराहारीं तवान्तिकम्। तत्र सम्प्रेषितामेनां विजने निरवग्रहे। सान्त्वयेथा यथाकामं सान्त्व्यमाना रमेद्यदि। वैशम्पायनउवाच। इत्युक्तः स विनिष्क्रम्य भगिन्या वचनात्तदा। सुरामाहारयामास राजार्हां सुपरिष्कृताम्। मद्यांश्च विविधाकारान् बहूंश्चोच्चावचांस्तदा। कारयामास कुशलैरन्नपानं सुशोभनम्। तस्मिन् कृते तदा देवी कीचकेनोपमन्त्रिता। सुदेष्णा प्रेषयामास सैरिन्ध्रीं कीचकालयम्"। तत्प्रेषिताया द्रौपद्याः कीचकेन कथादि "द्रौपद्युवाच। संप्रैषीद्राजपुत्त्री मां सुराहारीं तवान्तिकम्। पानमाहर मे क्षिप्रं पिपासा मयि चाब्रवीत्। कीचकउवाच। अन्या भद्रे! नयिष्यन्ति राजपुत्त्र्याः प्रतिश्रुतम्। इत्येनां दक्षिणे पाणौ सूतपुत्त्रः परामृशत्। द्रौपद्युवाच! यथैवाहं नाभिचरे कदाचित् पतीन्मदाद्वै मनसाऽपि जातु। तेनैव सत्येन वशीकृतं त्वां द्रक्ष्यामि पापं परिकृष्यमाणम्। वैशम्पायन उवाच। स तामभिप्रेक्ष्य विशालनेत्रां जिघृक्षमाणः परिभर्त्सयन्तीम्। जग्राह तामुत्तरवस्त्रदेशे स कीचकस्तां सहसाऽऽक्षिपन्तीम्। प्रगृह्यमाणा तु महाजवेन मुहुर्विनिश्वस्य च राजपुत्त्री। चिक्षेप तं गाढमकृष्यमाणा प्रवेपमानाऽतिरुषा शुभाङ्गी। तया समाक्षिप्ततनुः स पापः पपात शाखीव निकृत्तमूलः। सा गृहीता विधुन्वाना भूमावाक्षिप्य कीचकम्। सभां शरणमागच्छद्यत्र राजा युधिष्ठिरः। तां कीचकः प्रधावन्तीं केशपाशे परामृशत्। अथैनां पश्यतो राज्ञः पातयित्वा पदाऽबधीत्। तस्या योऽसौ तदाऽर्केण राक्षसः सन्नियोजितः। स कीचकमपोवाह वातवेगेन भारत!। स पपात तदा भूमौ रक्षोबलसमाहतः। विघूर्णमानो निश्चेष्टश्छिन्नमूल इव द्रुमः"। भा॰ वि॰ १५अ॰

**कीचकजित्** पु॰ कीचकं जितवान् जि–भूते क्विप्। भीमसेने कीचकभिदादयोऽप्यत्र भीमेन तस्य बधकथा च भा॰ वि॰२२अ॰। तत्रायं संक्षेपः कीचकधर्षितया द्रौपद्या तद्बधार्थं प्रार्थितेन भीमेन एकाकिना नाट्यशालायां त्वया रात्रौ आगतेन सह समेलनं भविष्यतीति कीचकं प्रति सङ्केतदानाय भीमेन नोदितया द्रौपद्या तथाऽनुष्ठिते भीमस्य नाट्यशालायां रात्रौ द्रौपदीस्थानीयतयाग्रे प्रवेशे तत्र कीचकगतौ तयोर्युद्धादिकमुपवर्ण्य भीमेन कीच-